# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा** – शास्त्री-**2** | **सत्रम् – 3** | **गुणाः - 70** |
| **विषयः –** पुराणेतिहासः | **प्रश्नपत्रम् - 7 - CE - 2.3.3** | **समयः - 8 तः 11** |
| **दिनाङ्कः- 16/10/2019** | **सन्दर्भग्रन्थः –** श्रीमद्भागवतपुराणम् - चतुर्थस्कन्धः | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं व्याख्या कार्या । 10**

1. योगं क्रियोन्नतिर्दर्पमर्थं बुद्धिरसूयत ।
   मेधा स्मृतिं ततिक्षा तु क्षेमं ह्रीः प्रश्रयं सुतम् ।।
2. अहो अनात्म्यं महदस्य पश्यत प्रजायतेर्यस्य चराचरं प्रजाः ।
   जहावसून यद्विमताऽऽत्मजा सती मनस्विनी मानमभीक्ष्णमर्हति ।।
3. गुणाधिकान्मुदं लिप्सेदनुक्रोशं गुणाधमात् ।
   मैत्रीं समानादन्विच्छेन्न तापैरभिभूयते ।।

**प्र-2 सतीशिवसंवादपूर्वकं दक्षयज्ञविध्वंसं सविस्तरं वर्णयत । 10**

**अथवा**

**ध्रुवचरितम् - विस्तारेण लिखत ।**

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं व्याखा कार्या । 10**

1. तं विचक्ष्य खलं पुत्रं शासनैर्विविधैर्नृपः ।
   यदा न शासितुं कल्पो भृशमासीत्सुदुर्मनाः ।।
2. ब्रह्मा जगद्गुरुर्दैवैः साहसृत्य सुरेश्वरैः ।
   वैन्यस्य दक्षिणे हस्ते दृष्ट्वा चिह्नं गदाभृतः ।।
3. इति प्रियं हितं वाक्यं भुव आदाय भूयतिः ।
   वत्सं कृत्वा मनुं पाणावदुहत्सकलौषधीः ।।

**प्र-4 पृथुचरिताधारेव नृपगुणान् विलिख्य पृथ्वीदोहनप्रसङ्गं सविस्तरं लिखत । 10**

**अथवा**

**पृथ्व्याः दोहनं वर्णयत ।**

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं व्याख्या कार्या । 10**

1. स एवं ब्राह्मपुत्रेण कुमारेणात्ममेधसा ।

दर्शितात्मगतिः सम्यक् प्रशस्योवाच तं नृपः ।।

2. न जानामि महाभाग परं कर्मायविद्धधीः ।
ब्रूहि मे विमलं ज्ञानं येन मुच्येय कर्मभिः ।।

3. परे ब्रह्मणि यात्मानं परं ब्रह्म तथाऽऽत्मनि ।
वीक्षमाणो विहायेक्षामस्मादुपरराम ह ।।

**प्र-6 कस्याप्यैकस्य सविस्तरमुत्तरं लिखत । 10**

**1. पृथो: स्वप्रजाभ्य: समुपदेश: ।**

**अथवा**

**2. पुरुञ्जनोपाख्यानस्य तात्पर्यं वर्णयत ।**

**(चतुर्थान्वितिः - युनिट-4 )**

**प्र-7 दशानां एकवाक्येन उत्तराणि लिखत । 10**

1. सती पितुः नाम किम्
2. सती पतिनामः किम्
3. ध्रुवस्य मातुः नाम किम्
4. ध्रुवस्य प्रपितामहः कः
5. चतुर्थस्कन्धे कति अध्यायाः सन्ति
6. पृथोः पत्न्या: नाम किम्
7. पृथु: कति अश्वमेघयज्ञा: कृताः
8. मनो: भार्यानाम किम्
9. उत्तानपादस्य पितुः नाम किम्
10. श्रीमद्भागवतमहापुराणस्य रचयिता कः
11. श्रीमद्भागवतमहापुराणे कति स्कन्धाः
12. पुराणस्य कति लक्षणानि
13. ब्रत्रयेण कस्य गणना
14. भद्वयेन कस्य गणना
15. मकारेण कस्य गणना

**************